श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ द्विपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विपञ्चाशः सर्गः ॥

## स्वयम्प्रभया पृष्टैर्वानरैस्तां प्रति स्ववृत्तान्तस्य वर्णनं तस्याः प्रभावेण च गुहातो बहिर्निष्क्रम्य तेषां सागरतटे गमनम्

अथ तानब्रवीत् सर्वान् विश्रान्तान् हरियूथपान्।
इदं वचनमेकाग्रा तापसी धर्मचारिणी॥ **4.52.1** ॥

वानरा यदि वः खेदः प्रणष्टः फलभक्षणात्।
यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि तां कथाम्॥ **4.52.2** ॥

तस्यास्तद् वचनं श्रुत्वा हनूमान् मारुतात्मजः।
आर्जवेन यथातत्त्वमाख्यातुमुपचक्रमे॥ **4.52.3** ॥

राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः।
रामो दाशरथिः श्रीमान् प्रविष्टो दण्डकावनम्॥ **4.52.4** ॥

लक्ष्मणेन सह भ्रात्रा वैदेह्या सह भार्यया।
तस्य भार्या जनस्थानाद् रावणेन हृता बलात्॥ **4.52.5** ॥

वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः।
राजा वानरमुख्यानां येन प्रस्थापिता वयम्॥ **4.52.6** ॥

अगस्त्यचरितामाशां दक्षिणां यमरक्षिताम्।
सहैभिर्वानरैर्मुख्यैरङ्गदप्रमुखैर्वयम्॥ **4.52.7** ॥

रावणं सहिताः सर्वे राक्षसं कामरूपिणम्।
सीतया सह वैदेह्या मार्गध्वमिति चोदिताः॥ **4.52.8** ॥

विचित्य तु वनं सर्वं समुद्रं दक्षिणां दिशम्।
वयं बुभुक्षिताः सर्वे वृक्षमूलमुपाश्रिताः॥ **4.52.9** ॥

विवर्णवदनाः सर्वे सर्वे ध्यानपरायणाः।
नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे॥ **4.52.10** ॥

चारयन्तस्ततश्चक्षुर्दृष्टवन्तो महद् बिलम्।
लतापादपसञ्छन्नं तिमिरेण समावृतम्॥ **4.52.11** ॥

अस्माद्धंसा जलक्लिन्नाः पक्षैः सलिलरेणुभिः।
कुरराः सारसाश्चैव निष्पतन्ति पतत्रिणः॥ **4.52.12** ॥

साध्वत्र प्रविशामेति मया तूक्ताः प्लवङ्गमाः।
तेषामपि हि सर्वेषामनुमानमुपागतम्॥ **4.52.13** ॥

अस्मिन् निपतिताः सर्वेऽप्यथ कार्यत्वरान्विताः।
ततो गाढं निपतिता गृह्य हस्तैः परस्परम्॥ **4.52.14** ॥

इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम्।
एतन्नः कार्यमेतेन कृत्येन वयमागताः॥ **4.52.15** ॥

त्वां चैवोपगताः सर्वे परिद्यूना बुभुक्षिताः।
आतिथ्यधर्मदत्तानि मूलानि च फलानि च॥ **4.52.16** ॥

अस्माभिरुपयुक्तानि बुभुक्षापरिपीडितैः।
यत् त्वया रक्षिताः सर्वे म्रियमाणा बुभुक्षया॥ **4.52.17** ॥

ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः।
एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयम्प्रभा॥ **4.52.18** ॥

प्रत्युवाच ततः सर्वानिदं वानरयूथपान्।
सर्वेषां परितुष्टास्मि वानराणां तरस्विनाम्॥ **4.52.19** ॥

चरन्त्या मम धर्मेण न कार्यमिह केनचित्।
एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितम्॥ **4.52.20** ॥

उवाच हनुमान् वाक्यं तामनिन्दितलोचनाम्।
शरणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणीम्॥ **4.52.21** ॥

यः कृतः समयोऽस्मासु सुग्रीवेण महात्मना।
स तु कालो व्यतिक्रान्तो बिले च परिवर्तताम्॥ **4.52.22** ॥

सा त्वमस्माद् बिलादस्मानुत्तारयितुमर्हसि।
तस्मात् सुग्रीववचनादतिक्रान्तान् गतायुषः॥ **4.52.23** ॥

त्रातुमर्हसि नः सर्वान् सुग्रीवभयशङ्कितान्।
महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि॥ **4.52.24** ॥

तच्चापि न कृतं कार्यमस्माभिरिह वासिभिः।
एवमुक्ता हनुमता तापसी वाक्यमब्रवीत्॥ **4.52.25** ॥

जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम्।
तपसः सुप्रभावेण नियमोपार्जितेन च॥ **4.52.26** ॥

सर्वानेव बिलादस्मात् तारयिष्यामि वानरान्।
निमीलयत चक्षूंषि सर्वे वानरपुङ्गवाः॥ **4.52.27** ॥

नहि निष्क्रमितुं शक्यमनिमीलितलोचनैः।
ततो निमीलिताः सर्वे सुकुमाराङ्गुलैः करैः॥ **4.52.28** ॥

सहसा पिदधुर्दृष्टिं हृष्टा गमनकाङ्क्षया।
वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा॥ **4.52.29** ॥

निमेषान्तरमात्रेण बिलादुत्तारितास्तया।
उवाच सर्वांस्तांस्तत्र तापसी धर्मचारिणी ॥ **4.52.30** ॥

निःसृतान् विषमात् तस्मात् समाश्वास्येदमब्रवीत्।
एष विन्ध्यो गिरिः श्रीमान् नानाद्रुमलतायुतः ॥ **4.52.31** ॥

एष प्रस्रवणः शैलः सागरोऽयं महोदधिः।
स्वस्ति वोऽस्तु गमिष्यामि भवनं वानरर्षभाः।
इत्युक्त्वा तद् बिलं श्रीमत् प्रविवेश स्वयम्प्रभा ॥ **4.52.32** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः ॥